श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे

# ॥ एकोनशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकोनशततमः सर्गः ॥

## भरतेन शत्रुघ्नादिभिः सह श्रीरामाश्रमे गत्वा तत्पर्णशालाया निरीक्षणं रुदता तेन भ्रातुश्चरणयोर्निपतनम्, श्रीरामेण तैः सार्धं समालिङ्गनम्

निविष्टायां तु सेनायामुत्सुको भरतस्ततः।
जगाम भ्रातरं द्रष्टुं शत्रुघ्नमनुदर्शयन्॥ **2.99.1** ॥

ऋषिं वसिष्ठं सन्दिश्य मातॄर्मे शीघ्रमानय।
इति त्वरितमग्रे स जगाम गुरुवत्सलः॥ **2.99.2** ॥

सुमन्त्रस्त्वपि शत्रुघ्नमदूरादन्वपद्यत।
रामदर्शनजस्तर्षो भरतस्येव तस्य च॥ **2.99.3** ॥

गच्छन्नेवाथ भरतस्तापसालयसंस्थिताम्।
भ्रातुः पर्णकुटीं श्रीमानुटजं च ददर्श ह॥ **2.99.4** ॥

शालायास्त्वग्रतस्तस्या ददर्श भरतस्तदा।
काष्ठानि चावभग्नानि पुष्पाण्यपचितानि च॥ **2.99.5** ॥

स लक्ष्मणस्य रामस्य ददर्शाश्रममीयुषः।
कृतं वृक्षेष्वभिज्ञानं कुशचीरैः क्वचित् क्वचित्॥ **2.99.6** ॥

ददर्श च वने तस्मिन् महतः सञ्चयान् कृतान्।
मृगाणां महिषाणां च करीषैः शीतकारणात्॥ **2.99.7** ॥

गच्छन्नेव महाबाहुर्द्युतिमान् भरतस्तदा।
शत्रुघ्नं चाब्रवीद्धृष्टस्तानमात्यांश्च सर्वशः॥ **2.99.8** ॥

मन्ये प्राप्ताः स्म तं देशं भरद्वाजो यमब्रवीत्।
नातिदूरे हि मन्येऽहं नदीं मन्दाकिनीमितः॥ **2.99.9** ॥

उच्चैर्बद्धानि चीराणि लक्ष्मणेन भवेदयम्।
अभिज्ञानकृतः पन्था विकाले गन्तुमिच्छता॥ **2.99.10** ॥

इतश्चोदात्तदन्तानां कुञ्जराणां तरस्विनाम्।
शैलपार्श्वे परिक्रान्तमन्योन्यमभिगर्जताम्॥ **2.99.11** ॥

यमेवाधातुमिच्छन्ति तापसाः सततं वने।
तस्यासौ दृश्यते धूमः सङ्कुलः कृष्णवर्त्मनः॥ **2.99.12** ॥

अत्राहं पुरुषव्याघ्रं गुरुसत्कारकारिणम्।
आर्यं द्रक्ष्यामि संहृष्टं महर्षिमिव राघवम्॥ **2.99.13** ॥

अथ गत्वा मुहूर्तं तु चित्रकूटं स राघवः।
मन्दाकिनीमनु प्राप्तस्तं जनं चेदमब्रवीत्॥ **2.99.14** ॥

जगत्यां पुरुषव्याघ्र आस्ते वीरासने रतः।
जनेन्द्रो निर्जनं प्राप्य धिङ्मे जन्म सजीवितम्॥ **2.99.15** ॥

मत्कृते व्यसनं प्राप्तो लोकनाथो महाद्युतिः।
सर्वान् कामान् परित्यज्य वने वसति राघवः॥ **2.99.16** ॥

इति लोकसमाक्रुष्टः पादेष्वद्य प्रसादयन्।
रामं तस्य पतिष्यामि सीताया लक्ष्मणस्य च॥ **2.99.17** ॥

एवं स विलपंस्तस्मिन् वने दशरथात्मजः।
ददर्श महतीं पुण्यां पर्णशालां मनोरमाम्॥ **2.99.18** ॥

सालतालाश्वकर्णानां पर्णैर्बहुभिरावृताम्।
विशालां मृदुभिस्तीर्णां कुशैर्वेदिमिवाध्वरे ॥ **2.99.19** ॥

शक्रायुधनिकाशैश्च कार्मुकैर्भारसाधनैः।
रुक्मपृष्ठैर्महासारैः शोभितां शत्रुबाधकैः ॥ **2.99.20** ॥

अर्करश्मिप्रतीकाशैर्घोरैस्तूणगतैः शरैः।
शोभितां दीप्तवदनैः सर्पैर्भोगवतीमिव ॥ **2.99.21** ॥

महारजतवासोभ्यामसिभ्यां च विराजिताम्।
रुक्मबिन्दुविचित्राभ्यां चर्मभ्यां चापि शोभिताम् ॥ **2.99.22** ॥

गोधाङ्गुलित्रैरासक्तैश्चित्रकाञ्चनभूषितैः।
अरिसन्धैरनाधृष्यां मृगैः सिंहगुहामिव ॥ **2.99.23** ॥

प्रागुदक्प्रवणां वेदिं विशालां दीप्तपावकाम्।
ददर्श भरतस्तत्र पुण्यां रामनिवेशने ॥ **2.99.24** ॥

निरीक्ष्य स मुहूर्तं तु ददर्श भरतो गुरुम्।
उटजे राममासीनं जटामण्डलधारिणम् ॥ **2.99.25** ॥

कृष्णाजिनधरं तं तु चीरवल्कलवाससम्।
ददर्श राममासीनमभितः पावकोपमम् ॥ **2.99.26** ॥

सिंहस्कन्धं महाबाहुं पुण्डरीकनिभेक्षणम्।
पृथिव्याः सागरान्ताया भर्तारं धर्मचारिणम् ॥ **2.99.27** ॥

उपविष्टं महाबाहुं ब्रह्माणमिव शाश्वतम्।
स्थण्डिले दर्भसंस्तीर्णे सीतया लक्ष्मणेन च ॥ **2.99.28** ॥

तं दृष्ट्वा भरतः श्रीमाञ्शोकमोहपरिप्लुतः।
अभ्यधावत धर्मात्मा भरतः केकयीसुतः ॥ **2.99.29** ॥

दृष्ट्वैव विललापार्तो बाष्पसन्दिग्धया गिरा।
अशक्नुवन् वारयितुं धैर्याद् वचनमब्रुवन्॥ **2.99.30** ॥

यः संसदि प्रकृतिभिर्भवेद् युक्त उपासितुम्।
वन्यैर्मृगैरुपासीनः सोऽयमास्ते ममाग्रजः॥ **2.99.31** ॥

वासोभिर्बहुसाहस्रैर्यो महात्मा पुरोचितः।
मृगाजिने सोऽयमिह प्रवस्ते धर्ममाचरन्॥ **2.99.32** ॥

अधारयद् यो विविधाश्चित्राः सुमनसः सदा।
सोऽयं जटाभारमिमं सहते राघवः कथम्॥ **2.99.33** ॥

यस्य यज्ञैर्यथादिष्टैर्युक्तो धर्मस्य सञ्चयः।
शरीरक्लेशसम्भूतं स धर्मं परिमार्गते॥ **2.99.34** ॥

चन्दनेन महार्हेण यस्याङ्गमुपसेवितम्।
मलेन तस्याङ्गमिदं कथमार्यस्य सेव्यते॥ **2.99.35** ॥

मन्निमित्तमिदं दुःखं प्राप्तो रामः सुखोचितः।
धिग्जीवितं नृशंसस्य मम लोकविगर्हितम्॥ **2.99.36** ॥

इत्येवं विलपन् दीनः प्रस्विन्नमुखपङ्कजः।
पादावप्राप्य रामस्य पपात भरतो रुदन्॥ **2.99.37** ॥

दुःखाभितप्तो भरतो राजपुत्रो महाबलः।
उक्त्वाऽऽर्येति सकृद् दीनं पुनर्नोवाच किञ्चन॥ **2.99.38** ॥

बाष्पैः पिहितकण्ठश्च प्रेक्ष्य रामं यशस्विनम्।
आर्येत्येवाभिसङ्क्रुश्य व्याहर्तुं नाशकत् ततः॥ **2.99.39** ॥

शत्रुघ्नश्चापि रामस्य ववन्दे चरणौ रुदन्।
तावुभौ च समालिङ्ग्य रामोऽप्यश्रूण्यवर्तयत्॥ **2.99.40** ॥

ततः सुमन्त्रेण गुहेन चैव
    समीयतू राजसुतावरण्ये।
दिवाकरश्चैव निशाकरश्च
    यथाम्बरे शुक्रबृहस्पतिभ्याम्॥ **2.99.41** ॥

तान् पार्थिवान् वारणयूथपार्हान्
    समागतांस्तत्र महत्यरण्ये।
वनौकसस्तेऽभिसमीक्ष्य सर्वे
    त्वश्रूण्यमुञ्चन् प्रविहाय हर्षम्॥ **2.99.42** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
अयोध्याकाण्डे एकोनशततमः सर्गः॥